खण्डपरिचयः

धात्वधिकार उक्तः। इदानीं प्रातिपदिकाधिकार उच्यते। यस्मात् प्रत्ययो विधीयते तस्य प्रकृतिरिति संज्ञा भवति। प्रकृतिर्द्विधा – धातुः प्रातिपदिकञ्च। अष्टाध्याय्यास्तृतीयेऽध्याये धातुभ्यः प्रत्यया विधीयन्ते। ते च व्याख्याताः। चतुर्थे, पञ्चमे चाध्याये प्रातिपदिकात् प्रत्यया विधीयन्ते। प्रातिपदिकाद् विधीयमानाः प्रत्ययास्त्रिविधा भवन्ति। सुप्प्रत्ययाः, स्त्रीप्रत्ययाः, तद्धितप्रत्ययाश्च। अनेनैव क्रमेणेमेऽस्मिन् ग्रन्थे व्याख्यायन्ते। अन्ते कारकप्रकरणं, समासाश्च। इत्थञ्च सन्त्यस्मिन् खण्डे पञ्च पाठाः सन्ति। तत्रादौ षोडशे पाठे सुबन्तप्रकरणमस्ति। प्रक्रियाग्रन्थेषु सिद्धान्तकौमुद्यादिष्वस्य प्रकरणस्य षड् विभागाः कृताः सन्ति। किन्तु विचारेणेदं सिध्यति यद् विश्वपा-गोपा-ग्रामणी-खलपू-यवक्री-इत्यादीनां रूपाणि स्त्रियां पुंसि च समानान्येव भवन्ति। नदीसंज्ञा, घिसंज्ञा च स्त्रीलिङ्गे, पुल्लिँगे चोभयत्र प्राप्नोति। अतो लिङ्गमनुसृत्य कृतेन विभागेन गौरवमेवापतति। अनेनैव हेतुना मयैषां प्रातिपदिकानां विभाजनं लिङ्गानुसारेण न कृतम्, अकारान्तादिक्रमेण च कृतम्।

हलन्तेषु नान्त-तान्त-सान्तान् विहायान्येषां दुह्-दिह्-लिह्-मिह्-सृज्-सरित्-भूभृत्-उपानह्-इत्यादीनां सुबन्तरूपाणि सन्धिसूत्रेणैव सिध्यन्ति। तत्र न भवत्येकमपि कार्यं सुप्प्रत्ययनिमित्तकम्। अत इमानि प्रातिपदिकानि, मया सुबन्तप्रकरणात् पृथक् कृतानि। रूपाणि चैषां सुबन्तपरिशिष्टे लिखितानि। सन्धिसूत्राणां सम्यगभ्यासं विधायैवास्मिन् प्रकरणे प्रवेष्टव्यम्। इत्थञ्चेदं सुबन्तप्रकरणं सर्वथा नूतनया, सरलया च रीत्यात्र प्रस्तूयते।

सप्तदशपाठे स्त्रीप्रत्ययाः सन्ति। इयं शङ्का वर्तते सर्वेषां मनःसु, यद् हंस, मयूर, चटक, गौर, मधुर, कुरुचर, औपगव, इत्यादयो ये शब्दाः पुल्लिँगे वर्तन्ते, तेषां स्त्रीलिङ्गे रूपं किं भवेत्, हंसा वा हंसी वा, मयूरा वा मयूरी वा, चटका वा चटकी वा, इति विज्ञानायाष्टाध्याय्यां 'ङ्याप्प्रातिपदिकात् (४.१.१)' इत्यधिकृत्य 'स्त्रियाम् (४.१.३)' इत्यधिक्रियते। अस्मिन्नधिकारे ये प्रत्यया विधीयन्ते, ते स्त्रियां भवन्ति। इदं स्त्रीत्वं लौकिकं नास्ति, यतः खट्वा, माला, इत्यादिष्वचेतनेष्वपि स्त्रीलिङ्गं भवति। तच्चेदं लिङ्गं स्तनकेशाद्यतिरिक्तमर्थनिष्ठमेव। तद्द्योतनाय ये प्रत्यया भवन्ति, ते स्त्रीप्रत्यया इति कथ्यन्ते। इमेऽत्र संक्षेपेणोच्यन्ते।

अष्टादशपाठे तद्धिताः सन्ति। विश्वस्य कस्यामपि भाषायामेवं न भवति, यदेकस्य प्रत्ययस्य योजनेन वाक्यस्य सर्वोऽर्थः प्रकृतौ प्रविशेत्। किन्तु संस्कृतेऽस्ति तादृशं सामर्थ्यम्। यथा – दशरथस्य पुत्रम्, इति वाक्यम्। अस्यार्थः दशरथशब्दे इञ्प्रत्ययस्य योजनेन प्रकृतौ प्रविशति। अतो योऽर्थो वर्तते दशरथस्य पुत्रम् इति वाक्यस्य, स एवार्थो वर्तते 'दाशरथिः' इत्यस्यापि। एवमेव मथुरायां भवः माथुरः। व्याकरणमधीते वैयाकरणः। कषायेण रक्तं वस्त्रं काषायम्। युवतीनां समूहो यौवतम्। सप्तत्या क्रीतं साप्ततिकम्, इत्यादिषु। एतादृशा अनन्ता अर्थास्तद्धितप्रत्ययैरभिव्यज्यन्ते। प्रातिपदिकाधिकारे विलक्षणकौशलेन निबद्धा इमे तद्धितप्रत्यया अत्र तथा संक्षिप्याच्यन्ते, येन संक्षेपेणाप्येषां विज्ञानं स्यात्।

अर्थबोधाय वाक्येषु कदाचित् पार्थक्येन, कदाचिच्चैकीकृत्य पदानां यथान्वयं प्रयोगो विधीयते। अनेकेषां पदानामेकीकरणप्रक्रियैव व्याकरणशास्त्रे समासपदेनाभिधीयते। सा चात्र यकोनविंशे पाठे सरलोपायेन व्याख्याता।

वाक्यात्मिकायां भाषायां कर्मादिकारकविशेषं सम्बन्धविशेषं वावबोधयितुं सविभक्तिकानि पदानि प्रयुज्यन्ते। कारकज्ञानं विना तेषा पदानां साधुत्वं, विभक्तीनां प्रयोगव्यवस्था चावगन्तुं न शक्यते। अतः संस्कतभाषायाः सम्यक्प्रयोगकरणाय कारकादिज्ञानस्य, प्रथमादिविभक्तिज्ञानस्य चावश्यकतां परिलक्ष्य मया विंशे पाठे कारकाणि विभक्तयश्च सरलोपायेन व्याख्यातानि।

© jk"V";laLd`rlaLFkkue-]uonsgyh]2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

शीर्षकम्-सुबन्तम्

पाठसंरचना

१६.१ प्रस्तावना
१६.२ उद्देश्यम्
१६.३ सुबन्तप्रवेशः
१६.३.१ सुबन्तविषयकसंज्ञासूत्राणि
१६.४ अजन्तप्रातिपदिकानि
१६.४.१ पुल्लिँगे - अदन्ताः
१६.४.२ पुल्लिँगे - अदन्तसर्वनामशब्दाः
१६.४.३ अदन्तनपुंसकलिङ्गशब्दाः
१६.४.४ आकारान्ता आबन्ताः
१६.४.५ आकारान्ता धात्वन्ताः
१६.४.६ ईकारान्ता, ऊकारान्ताः
१६.४.७ पुल्लिँङ्गे घिसंज्ञका इदन्ता उदन्ताः
१६.४.८ स्त्रीलिङ्गे घिसंज्ञका इदन्ता उदन्ताः
१६.४.९ नपुंसकलिङ्गे इदन्ता उदन्ताः
१६.४.१० ऋकारान्ताः
१६.५ हलन्ताः
१६.५.१ अन्नन्ताः
१६.५.२ श्वन्-युवन्-मघवन्, इत्येतेऽन्नन्ताः
१६.५.३ पूषन्, अर्यमन्, अन्नन्तौ
१६.५.४ इन्नन्ताः
१६.५.५ अत्वन्ताः
१६.५.६ शत्रन्ताः
१६.५.७ महत्शब्दः, तकारान्तः
१६.५.८ असन्ताः
१६.५.९ असन्ता नपुंसकलिङ्गे
१६.५.१० वस्वन्ताः
१६.६ बोधप्रश्नाः
१६.७ सारांशः
१६.८ शब्दावली
१६.९ सन्दर्भग्रन्थाः
१६.१० सहायकग्रन्थाः

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

१६.११ बोधप्रश्नोत्तराणि

१६.१२ अभ्यासप्रश्नाः

१६.१ प्रस्तावना

पदसमूहो वाक्यम्। पदं नाम सुबन्तं च, तिङन्तंच। तथा चोक्तं पाणिनिना – सुप्तिङन्तं पदम्। सुबन्तशब्दस्य, तिङन्तशब्दस्य च व्याकरणशास्त्रे पदेति संज्ञा विधीयते। तिङन्तप्रक्रिया उक्ता। सुप्प्रत्ययाश्च 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रोक्ता एकविंशतिसंख्याकाः सन्ति। इमे च प्रत्यया 'ङ्याप्प्रातिपदिकात्' इत्यधिकारानुरोधेन ङ्यन्ताद् आबन्तात् प्रातिपदिकात् च परे भवन्ति। एषां प्रातिपदिकानां विभाजनमत्र अत्र अकारान्तादिक्रमेण कृत्वेदं सुबन्तप्रकरणं सर्वथा नूतनया, सरलया च रीत्या प्रस्तूयते।

अत्र लिङ्गानुसारेण प्रातिपदिकानां विभाजनं न कृतम्, यतः सुप्प्रत्ययनिमित्तं किमप्यङ्गकार्यं लिङ्गमुद्दिश्य न प्रवर्तते, अतो लिङ्गानुसारेण प्रातिपदिकानां विभाजनमसमीचीनमेव।

१६.२ उद्देश्यम्

अस्य पाठस्याध्ययनेन भवताम् –

- सुबन्तप्रक्रियाया ज्ञानं सारल्येन भविष्यति।
- घि–नदी–भ–पद–सर्वनामस्थान–इत्यादीनां संज्ञानां प्रयोजनस्य ज्ञानं भविष्यति।
- संस्कृतशब्दज्ञानं वर्धिष्यते।
- वाग्व्यवहारस्य सामर्थ्यं च वर्धिष्यते।

१६.३ सुबन्तप्रवेशः

ङ्याप्प्रातिपदिकात् ।।४।१।१।। अष्टाध्याय्याश्चतुर्थे पञ्चमे चाध्याये ङ्यन्तादाबन्तात् प्रातिपदिकाच्च प्रत्यया विधीयन्ते।प्रातिपदिकाद् विधीयमानाः प्रत्ययस्त्रिविधाः।सुप्प्रत्ययाः, स्त्रीप्रत्ययाः, तद्धितप्रत्ययाश्च। तत्र सुप्प्रत्यया उच्यन्ते।

स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्

।।४।१।२।। ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे – सु औ जस्। अम् औट् शस्। टा भ्याम् भिस्। ङे भ्याम् भ्यस्। ङसि भ्याम् भ्यस्। ङस् ओस् आम्। ङि ओस् सुप्। इमे स्वादयः प्रत्यया भवन्ति। 'विभक्तिश्च १।।४।१०३' इत्यनेन सूत्रेणैषां सुप्प्रत्ययानां विभक्तिसंज्ञा भवति। प्रथमे पाठे इत्संज्ञाप्रकरणं वर्तते। तदनुसारेणात्रेत्संज्ञा विधातव्या। 'न विभक्तौ तुस्माः' इत्येनेनात्र तवर्गसकार–मकाराणामित्संज्ञा न भवतीति ध्येयम्। इत्संज्ञानन्तरमेषां निरनुबन्धप्रत्ययानां स्वरूपमेवं भवति ---

	सानुबन्धाः सुप्प्रत्ययाः			**निरनुबन्धा मूलसुप्रत्ययाः**		
प्रथमा	सु	औ	जस्	स्	औ	अः
द्वितीया	अम्	औट्	शस्	अम्	औ	अः
तृतीया	टा	भ्याम्	भिस्	आ	भ्याम्	भिः
चतुर्थी	ङे	भ्याम्	भ्यस्	ए	भ्याम्	भ्यः
पञ्चमी	ङसि	भ्याम्	भ्यस्	अः	भ्याम्	भ्यः
षष्ठी	ङस्	ओस्	आम्	अः	ओः	आम्
सप्तमी	ङि	ओस्	सुप्	इ	ओः	सु

© jkf"V";laLd`rlaLFkkue~]uobfnYyh]2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

एते सुप्प्रत्ययाः सन्ति। प्रातिपदिकप्रत्यययोः संयोजनानन्तरं 'सुप्तिङन्तं पदम्' इत्यनेन पदसंज्ञायां पदान्तस्य सकारस्य 'ससजुषो रुः' इति रुत्वे 'खरवसानयोर्विसर्जनीयः' इति विसर्गो भवति।

एकवचनं सम्बुद्धिः ।२।३।४९।।सम्बोधनेऽर्थे प्रथमैव विभक्तिर्भवति।तत्र प्रथमैकवचनस्य 'सु' इत्यस्य सम्बुद्धिसंज्ञा भवति।

सुपः ।।१।४।१०३।। एषां सुपप्रत्ययानां त्रीणि त्रीणि यथाक्रमम् एकवचनद्विवचन-बहुवचनसंज्ञानि भवन्ति। सु इत्येकवचनम्। औ इति द्विवचनम्। जस् इति बहुवचनम्। एवं सर्वत्र।

द्व्येकयोर्द्विवचनैकवचने ।।१।४।२२।। द्वित्वविवक्षायां द्विवचनं भवति। एकत्व-विवक्षायामेकवचनं भवति।

बहुषु बहुवचनम् ।।१।४।२१।। बहुत्वविवक्षायां बहुवचनं भवति।

इदानीं सुबन्तप्रक्रियायां प्रवेशात् प्राक् यासां ज्ञानमावश्यकं ताः संज्ञा उच्यन्ते –

१६.३.१ सुबन्तविषयकसंज्ञासूत्राणि

सर्वनामस्थानसंज्ञा

शि सर्वनामस्थानम् ।१।४।२१।। 'जश्शसोः शिः' इत्यनेन नपुंसकाद् अङ्गादुत्तरस्योः जश्शसोः स्थाने शि इत्यादेशो भवति। अस्य शिप्रत्ययस्य सर्वनामस्थानसंज्ञा भवति।

सुडनपुंसकस्य। १। ४। २२।। सु औ जस् अम् औट्, इत्येतेषां पञ्च प्रत्ययानां सर्वनामस्थानसंज्ञा भवति। इयं संज्ञा नपुंसकलिङ्गे न भवति। सर्वनामस्थानभिन्नाः षोडश प्रत्यया असर्वनामस्थानसंज्ञका भवन्ति।

भसंज्ञा

संज्ञाप्रकरणे व्याख्याता। तदनुसारेण 'यचि भम्' इति सूत्रेण – शस्। टा। ङे। ङसि। ङस्। ओस्। आम्। ङि। ओस्। एषु प्रत्ययेषु परतोऽङ्गस्य भसंज्ञा भवति। अष्टाध्याय्यां भस्याङ्गस्य कृते सर्वं कार्यं 'भस्य ६.४.१२९' इत्यधिकृत्योच्यते।

पदसंज्ञा

संज्ञाप्रकरणे व्याख्याता। तदनुसारेण भ्याम्। भिस्। भ्याम्। भ्यस्। भ्याम्। भ्यस्। सुप्। एषु याद्यजादिभिन्नेषु प्रत्ययेषु परतोऽङ्गस्य पदसंज्ञा भवति। अष्टाध्याय्यां पदस्य कृते सर्वं कार्यं 'पदस्य ८.१.१६' इत्यधिकृत्योच्यते।

अथ सुबन्तप्रक्रियारभ्यते

प्रक्रियायां प्रवेशात् प्राक् सन्धीनां सम्यगभ्यासो भवेत्। इदानीं सुबन्तप्रक्रियारभ्यते। सर्वेभ्यः प्रातिपदिकेभ्य इमे २१ प्रत्यया भवन्ति। प्रत्यये सति प्रातिपदिकस्याङ्गसंज्ञा भवति। अङ्ग एव प्रकृतिरित्युच्यते। सुबन्तप्रक्रियायाः त्रयो विभागा भवन्ति –

१. प्रत्ययादेशः। २. प्रत्ययागमः। ३. सुप्प्रत्यये परतः अङ्गकार्याणि।

राम + भिस्। अत्र प्रत्ययस्य स्थाने ऐस् इत्यादेशो भवति – राम + ऐस् = रामैः। इदं कार्यं प्रत्ययादेश इत्युच्यते।

राम + आम् > राम + नुट् + आम् > राम + नाम् = रामाणाम्। नदी + ङे > नदी + आट् + ए > नदी + ऐ = नद्यै। इदं कार्यं प्रत्ययागम इत्युच्यते।

राम + भ्याम् – अत्र प्रत्यये परतः प्रकृतेः स्थाने दीर्घ आदेशो भवति – रामा + भ्याम् = रामाभ्याम्। राम + ओस् – अत्र प्रकृतेः स्थाने एकार आदेशो भवति – रामे + ओस् = रामयोः। राम

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

+ भ्यस् – अत्र प्रकृतेः स्थाने एकार आदेशो भवति – रामे + भ्यस् = रामेभ्यः। प्रत्ययनिमित्तेन अङ्गस्य स्थाने जायमानं कार्यमङ्गकार्यमित्युच्यते। इमे प्रत्ययादेशाः, प्रत्ययागमा, अङ्गकार्यं च यथास्थानं पृथक्कृत्य वक्ष्यन्ते।

१६.४ अजन्तप्रातिपदिकानि

१६.४.१ पुल्लिँगे – अदन्ताः

अदन्तप्रातिदिकानां कृते प्रत्ययादेशाः, प्रत्ययागमाश्च

सुप्रत्यया उक्ताः। अकारान्तादङ्गात् परत एषां स्थाने ये आदेशा भवन्ति, त उच्यन्ते ----

टाङसिङसामिनात्स्याः ।७।१।१२।। अकारान्तादङ्गात् उत्तरस्य 'टा' इत्यस्य 'इन', 'ङसि' इत्यस्य 'आत्', 'ङस्' इत्यस्य 'स्य' इत्यादेशा भवन्ति। राम + टा > राम + इन = रामेण।

अतो भिस ऐस् ।७।१।९।। अकारान्तादङ्गाद्भिसः स्थाने 'ऐस्' इत्यादेशो भवति। अनेकल्त्वात्सर्वादेशः। रामैः।।

ङेर्यः ।७।१।१३।। अतोऽङ्गात्परस्य 'ङे' इत्यस्य 'य' इत्यादेशो भवति। रामाय।

जसः शी ।७।१।१७।। अदन्तात्सर्वनाम्नः परस्य जसः शी इत्यादेशो भवति। अनेकाल्त्वात्सर्वादेशः। सर्व + जस् > सर्व + शी > सर्व + ई = सर्वे।

सर्वनाम्नः स्मै ।७।१।१४।। अतः सर्वनाम्नो ङे इत्यस्य स्मै इत्यादेशो भवति। सर्वस्मै।

ङसिङ्योः स्मात्स्मिनौ ।७।१।१५।। अदन्तात् सर्वनाम्नो ङसिङ्योः स्थाने स्मात्, स्मिन् इत्येतौ आदेशौ भवतः।सर्व + ङसि – सर्व + स्मात् = सर्वस्मात्।सर्व + ङि – सर्व + स्मिन् = सर्वस्मिन्।

ह्रस्वनद्यापो नुट् ।७।१।५४।। ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमो भवति।
राम + आम् > राम + नुट् + आम् > राम + नाम्

अदन्तानां कृतेऽङ्गकार्याणि

राम + सु > राम + स् > रुत्वविसर्गौ। रामः।।

राम + औ > अत्र 'वृद्धिरेचि' इति वृद्धिः प्राप्नोति। तां वृद्धिं प्रबाध्य –

प्रथमयोः पूर्वसवर्णः(पा०सू०६.१.१००) – अकः प्रथमाद्वितीययोरचि परे पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घ एकादेशो भवति। इति पूर्वसवर्णदीर्घैकादेशे प्राप्ते –

नादिचि (पा०सू०६.१.१०२) – अवर्णादिचि परे पूर्वसवर्णदीर्घो न भवति।

तेन पुनः 'वृद्धिरेचि' इति वृद्धिर्भवति – रामौ। राम + जस् – अकः सवर्णे दीर्घः, इति प्राप्तं सवर्णदीर्घं प्रबाध्य –

अतो गुणे ।६।१।९७।। अपदान्तादकाराद्गुणे परतः पररूपमेकादेशः भवति, इति प्राप्ते। परत्वात् 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घैकादेशो भवति – रामाः।

सम्बुद्धौ प्रथमाविभक्तिरेव भवति।

एङ्ह्रस्वात्सम्बुद्धेः ।६।१।६९।। एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत्।

हे राम + सु = हे राम। हे रामौ। हे रामाः। राम + अम् –

अमि पूर्वः (पा०सू०६.१.१०५) – अकोऽमि योऽच् तस्मिन्परे पूर्वपरयोः स्थाने पूर्वरूप-मेकादेशो भवति। रामम्। रामौ।

राम + शस् –'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घैकादेशे – रामास् इति जाते –

तस्माच्छसो नः पुंसि ।६।१।१०३।। पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य 'न्'

© jkf"V";laLd`rlaLFkkue-]uonsygh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

इत्यादेशो भवति पुंसि।। रामान्। राम + टा > राम + इन = रामेण। राम + भ्याम् –

सुपि च ।७।३।१०२।। यञादौ सुपि परे अतोऽङ्गस्य दीर्घो भवति। रामाभ्याम्।

राम + भिस् > राम + ऐस् = रामैः। राम + ङे > राम + य > सुपि चेति दीर्घे – रामाय। रामाभ्याम्। राम + भ्यस् –

बहुवचने झल्येत् ।७।३।१०३।।झलादौ बहुवचने सुपि परे अदन्तस्याङ्गस्यैकार इत्यादेशो भवति। रामेभ्यः। राम + ङसि > राम + आत् = रामात्, पक्षे जश्त्वे – रामाद्। रामाभ्याम्। रामेभ्यः।

राम + ङस् > राम + स्य > रामस्य। राम + ओस् –

ओसि च।७।३।१०४।। ओसि परे अदन्तस्याङ्गस्यैकार इत्यादेशो भवति। राम + ओस् – रामे + ओस् > अयादेशे – रामयोः। राम + आम् –

ह्रस्वनद्यापो नुट् ।७।१।५४।। ह्रस्वान्तान्नद्यन्ताबन्ताच्चाङ्गात्परस्यामो नुडागमो भवति।

राम + नाम् –

नामि ।६।४।३।। नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्। रामाणाम्। रामे। रामयोः।

राम + सु > बहुवचने झल्येत् इत्येत्वे, 'आदेशप्रत्यययोः' इति मूर्धन्यादेशे > रामेषु।

एवं कृष्णमुकुन्दगोविन्दादयः सर्वे अदन्तपुंल्लिङ्गशब्दा निष्पाद्याः।

आदेशेन, आगमेन च ये प्रत्ययाः परिवर्तितास्तेऽत्र स्थूलाक्षरैः लिख्यन्ते। यत्र किमपि न लिखितं तत्र मूलप्रत्यय एव भवतीति ज्ञेयम्।

अदन्तपुंल्लिङ्गकृते विशेषप्रत्ययाः			अदन्तपुंल्लिङ्गरामशब्दः		
×	×	×	रामः	रामौ	रामाः
×	×	×	रामम्	रामौ	रामान्
इन	×	***ऐः***	***रामेण***	रामाभ्याम्	***रामैः***
य	×	×	***रामाय***	रामाभ्याम्	रामेभ्यः
आत्	×	×	***रामात्***	रामाभ्याम्	रामेभ्यः
स्य	×	***नाम्***	***रामस्य***	रामयोः	***रामाणाम्***
×	×	×	रामे	रामयोः	रामेषु
			हे राम	हे रामौ	हे रामाः

१६.४.२ पुल्लिंगे – अदन्तसर्वनामशब्दाः

सर्वादीनि सर्वनामानि । १।१।२७।। सर्वादयश्च पञ्चत्रिंशत्। सर्व, विश्व, उभ, उभय, डतर, डतम, अन्य, अन्यतर, इतर, त्वत्, त्व, नेम, सम, सिम। डतरडतमौ प्रत्ययौ। प्रत्ययग्रहणे तदन्ता ग्राह्याः।पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् (गणसूत्रम्) ।स्वमज्ञातिधनाख्यायाम्। (गणसूत्रम्) अन्तरं बहिर्योगोपसंव्यानयोः (गणसूत्रम्)। त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम्, इति।

अदन्तसर्वनाम्नां कृते प्रत्ययादेशाः, प्रत्ययागमाश्च

जसः शी ।७। १। १७।। अदन्तात्सर्वनाम्नः परस्य जसः स्थाने शी त्यादेशो भवति। अनेकाल्त्वात्सर्वादेशः। सर्व + जस् > सर्व + ई > आद्गुणः इति गुणे = सर्वे।

सर्वनाम्नः स्मै ।७।१।१४।।अदन्तात्सर्वनाम्नः परस्य ङे इत्यस्यस्थाने स्मै इत्यादेशो भवति। सर्व + ङे > सर्व + स्मै = सर्वस्मै।।

ङसिङ्योः स्मात्स्मिनौ ।७।१।१५।।अदन्तात्सर्वनाम्नः परयोः ङसिङ्योः स्थाने स्मात्स्मिनौ आदेशौ भवतः। सर्व + ङसि > सर्व + स्मात् = सर्वस्मात्। सर्व + ङि > सर्व + स्मिन् = सर्वस्मिन्।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

आमि सर्वनाम्नः सुट् ।७।१।५२।। अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमो भवति। सर्व + आम् > सर्व + साम्। 'बहुवचने झल्येत्' इति एत्वे –सर्वेषाम्।

आदेशेन, आगमेन च ये प्रत्ययाः परिवर्तितास्तेऽत्र स्थूलाक्षरैः लिख्यन्ते। अदन्तरामशब्द उक्तः। तदपेक्षयात्र सर्वनामशब्देषु पञ्च प्रत्यया भिद्यन्ते। त उक्ताः। अन्येषु षोडशप्रत्ययेषु रूपाणि रामवदेव भवन्ति।

अदन्तपुंल्लिङ्गसर्वनामकृते प्रत्ययाः			अदन्तपुंल्लिङ्ग-सर्वशब्दः		
×	×	***ई***	सर्वः	सर्वौ	***सर्वे***
×	×	×	सर्वम्	सर्वौ	सर्वान्
×	×	×	सर्वेण	सर्वाभ्याम्	सर्वेभ्यः
स्मै	×	×	***सर्वस्मै***	सर्वाभ्याम्	सर्वेभ्यः
स्मात्	×	×	***सर्वस्मात्***	सर्वाभ्याम्	सर्वेभ्यः
×	×	***साम्***	सर्वस्य	सर्वयोः	***सर्वेषाम्***
स्मिन्	×	×	***सर्वस्मिन्***	सर्वयोः	सर्वेषु

एवं एकशब्द एकवचने – एकः। एकम्। एकेन। एकस्मै। एकस्मात्। एकस्य। एकस्मिन्।

त्यदादीनामः ।७।२।१०२।। त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, एते त्यदादयः। एषामकारोऽन्तादेशः स्याद्विभक्तौ। यद् – य। अकारान्तत्वात् सर्ववद् रूपाणि भवन्ति। यः यौ ये। यम् यौ यान्, इत्यादीनि। 'किमः कः' इति सूत्रेण किम्शब्दस्य 'क' इत्यादेशो भवति। अकारान्तत्वात् सर्ववद् रूपाणि भवन्ति। कः कौ के। कम् कौ कान्, इत्यादीनि।

तद् + सु। 'तदोः सः सावनन्त्ययोः' इति सुप्रत्यये, तदोः स्थाने सकारादेशे – सः तौ ते। तम् तौ तान्। एतद् – एषः एतौ एते। एतम् एतौ एतान्। 'त्यदादीनामः' इति अकारादेशेऽन्यत् सर्वं सर्ववत्।

तद्-शब्दः पुल्लिँङ्गे			एतद्-शब्दः पुल्लिँङ्गे		
सः	तौ	***ते***	एषः	एतौ	***एते***
तम्	तौ	तान्	एतम्	एतौ	एतान्
तेन	ताभ्याम्	तैः	एतेन	एताभ्याम्	एतैः
तस्मै	ताभ्याम्	तेभ्यः	***एतस्मै***	एताभ्याम्	एतेभ्यः
तस्मात्	ताभ्याम्	तेभ्यः	***एतस्मात्***	एताभ्याम्	एतेभ्यः
तस्य	तयोः	***तेषाम्***	एतस्य	एतयोः	***एतेषाम्***
तस्मिन्	तयोः	तेषु	***एतस्मिन्***	एतयोः	एतेषु

द्विशब्दो द्विवचने द्वि – द्व। द्वौ। द्वौ। द्वाभ्याम्। द्वाभ्याम्। द्वाभ्याम्। द्वयोः। द्वयोः।

१६.४.३ अदन्तनपुंसकलिङ्गशब्दाः

प्रत्ययादेशाः

अदन्तनपुंसककृते विशेषप्रत्ययाः			अदन्तनपुंसकफलशब्दः		
अम्	***ई***	***इ***	फलम्	फले	फलानि
अम्	***ई***	***इ***	फलम्	फले	फलानि

अतोऽम् ।७।१।२४।। अदन्ताद् अङ्गात् नपुंसकादुत्तरस्य स्वमोः स्थाने अम् इत्यादेशो

© jkf"V";laLd`rlaLFkkue~] ubZ fnYyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

भवति। फल + सु > फल + अम् > ‘अमि पूर्वः’ इति पूर्वरूपे – फलम्।

नपुंसकाच्च ।७।१।१९।। नपुंसकाद् अङ्गादुत्तरस्य औङः स्थाने शी इत्यादेशो भवति। फल + औ > फल + शी > फल + ई = फले।

जश्शसोः शिः ।७।१।२०।। नपुंसकाद् अङ्गादुत्तरस्योः जश्शसोः स्थाने शि इत्यादेशो भवति। अस्य शिप्रत्ययस्य ‘शि सर्वनामस्थानम्’ इति सर्वनामस्थानसंज्ञा भवति।

अङ्गकार्यम्

नपुंसकस्य झलचः ।७।१।७२।। झलन्तस्याऽजन्तस्य च नपुंसकस्य नुमागमो भवति, सर्वनामस्थाने परे। फल + जस् > फल + शि – फल + इ > नुमागमे – फलन् + इ –

सर्वनामस्थाने चासम्बुद्धौ ।६।४।८।। नान्तस्योपधाया दीर्घो भवति असम्बुद्धौ सर्वनामस्थाने परे। फलन् + इ > फलान् + इ = फलानि।

शेषं रामवत्। एवं धनवनफलादयः।। तद् ते तानि। तद् ते तानि। एतद् एते एतानि। एतद् एते एतानि। शेषं पुंवत्। किम् के कानि। किम् के कानि। शेषं पुंवत्।

१६.४.४ आकारान्ता आबन्ताः

आकारान्तास्त्रिविधा भवन्ति। आबन्ताः स्त्रीलिङ्गाः, धात्वन्ताः, अन्ये च। तत्र आबन्ता उच्यन्ते।

आबन्तानां कृते प्रत्ययादेशा, प्रत्ययागमाश्च

औङ आपः ।७।१।१८।। आबन्तादङ्गात् परस्यौङः स्थाने शी इत्यादेशो भवति।
रमा + औ > रमा + शी > रमा + ई = रमे।

ङेराम् नद्याम्नीभ्यः ।७।३।११६।। नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् इत्यादेशो भवति।

याडापः ।७।३।११३।। आपः परस्य ङिद्वचनस्य याडागमो भवति। रमा + ङे > रमा + याट् + ङे > ‘वृद्धिरेचि’ इति वृद्धौ – रमायै। रमा + स् – सवर्णदीर्घः = रमायाः। रमायाम्।

अङ्गकार्यम्

सम्बुद्धौ च ।७।३।१०६।। आप एकारो भवति सम्बुद्धौ परतः। ‘एङ्ह्रस्वात्’ इति सम्बुद्धिलोपः। हे रमे। हे रमे। हे रमाः। रमाम्। रमे। रमाः। स्त्रीत्वान्नत्वाभावः।।

आङि चापः ।७।३।१०५।। आङि ओसि च परे आबन्तस्याऽङ्गस्य एकारादेशो भवति रमा + टा > रमे + आ = रमया। रमाभ्याम्। रमाभिः। रमयोः। रमाणाम्। रमायाम्। रमयोः। रमासु। एवं विद्याराधादुर्गादयः।।

आबन्तस्त्रीलिङ्गकृते विशेषप्रत्ययाः

×	*ई*	×
×	*ई*	×
×	×	×
यै	×	×
याः	×	×
याः	×	×
याम्	×	×

आबन्तस्त्रीलिङ्गरमाशब्दः

रमा	*रमे*	रमाः
रमाम्	*रमे*	रमाः
रमया	रामाभ्याम्	रमाभिः
रमायै	रामाभ्याम्	रमाभ्यः
रमायाः	रमाभ्याम्	रमाभ्यः
रमायाः	रमयोः	*रमाणाम्*
रमायाम्	रमयोः	रमासु
हे रमे	हे रमे	हे रमाः

सर्वनाम्नः स्याड्ढ्रस्वश्च ।७।३।११४।। आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् आगमो

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

भवति, आपश्च ह्रस्वः। याटोऽपवादः। सर्वस्यै। सर्वस्याः। सर्वस्याः। 'आमि सर्वनाम्नः' इति सुट्। सर्वासाम्। सर्वस्याम्। सर्वयोः। सर्वासु। एवं विश्वादय आबन्ताः।।

तद्-शब्दः स्त्रीलिङ्गे			एतद्-शब्दः स्त्रीलिङ्गे		
सा	*ते*	ताः	एषा	*एते*	एताः
ताम्	*ते*	ताः	एताम्	*एते*	एताः
तया	ताभ्याम्	ताभिः	एतया	एताभ्याम्	एताभिः
तस्यै	ताभ्याम्	ताभ्यः	*एतस्यै*	एताभ्याम्	एताभ्यः
तस्याः	ताभ्याम्	ताभ्यः	*एतस्याः*	एताभ्याम्	एताभ्यः
तस्याः	तयोः	*तासाम्*	*एतस्याः*	एतयोः	*एतासाम्*
तस्याम्	तयोः	तासु	*एतस्याम्*	एतयोः	एतासु

एवं – यद् – या ये याः। सर्वा – सर्वा सर्वे सर्वाः। किम् – का के काः। इत्यादयः।

१६.४.५ आकारान्ता धात्वन्ताः

येषामन्ते आकारान्तो धातुर्भवति, ते आकारान्ता धात्वन्ताः शब्दाः, यथा – गोपा, शङ्खध्मा, भूरिदा, प्रदा, प्रख्या, विश्वपा, इत्यादयः। एषां रूपाणि – विश्वपा + सु > रुत्वविसर्गौ = विश्वपाः। विश्वपा + औ > वृद्धिः = विश्वपौ। विश्वपाः। विश्वपाम्। विश्वपौ। विश्वपा + शस् > अङ्गस्य भसंज्ञायाम् –

आतो धातोः ।६।४।१४०।। आकारान्तो यो धातुस्तदन्तस्य भस्याऽङ्गस्य लोपः स्यात्। 'अलोऽन्त्यस्य' इत्यन्त्स्याकारस्य लोपे – विश्वपः। एवमेव – टा। ङे। ङसि। ङस्। ओस्। आम्। ङि। ओस्। एषु प्रत्ययेषु परतोऽङ्गस्य भसंज्ञायामाकारलोपे – विश्वपा। विश्वपे। विश्वपः। विश्वपः। विश्वपोः। विश्वपोः। विश्वपाम्। विश्वपि।

हलादिषु प्रत्ययेषु न किमपि – विश्वपाभ्यामित्यादि। एवं शङ्खध्मादयः। येऽन्ये तत्र सन्धिरेव कार्यम्।

सुप्प्रत्ययाः					
स्	औ	अः	विश्वपाः	विश्वपौ	विश्वपाः
अम्	औ	अः	विश्वपाम्	विश्वपौ	*विश्वपः*
आ	भ्याम्	भिः	*विश्वपा*	विश्वपाभ्याम्	विश्वपाभिः
ए	भ्याम्	भ्यः	*विश्वपे*	विश्वपाभ्याम्	विश्वपाभ्यः
अः	भ्याम्	भ्यः	*विश्वपः*	विश्वपाभ्याम्	विश्वपाभ्यः
अः	ओः	आम्	*विश्वपः*	*विश्वपोः*	*विश्वपाम्*
इ	ओः	सु	*विश्वपि*	*विश्वपोः*	विश्वपासु
			विश्वपाः	विश्वपौ	विश्वपाः

येऽन्ये सन्त्याकारान्तास्तत्र सन्धिरेव कार्यम्। यथा – हाहा + ए = हाहै। हाहा + इ = हाहे।

१६.४.६ ईकारान्ता ऊकारान्ताः

ईकारान्ता, ऊकारान्ताश्च शब्दा द्विविधा भवन्ति। नदीसंज्ञका, अनदीसंज्ञकाश्च।

नदीसंज्ञा

यूस्त्र्याख्यौ नदी ।१।४।३।। ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ भवतः।

येषामन्ते ईकारो भवति, ऊकारो भवति, तेषां नित्यस्त्रीलिङ्गानां शब्दानां नदीसंज्ञा भवति। यथा

© jkf"V";laL—rlaLFkkue~] uonsgyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

– गौरी। नदी। हंसी।महिषी। श्रेयसी। शार्ङ्गरवी, लक्ष्मी। तन्त्री।वधू। श्वश्रू। चमू। ब्रह्मबन्धू। इत्यादयः।

किन्तु यदा इमे नदीसंज्ञकाः शब्दा वृत्त्यन्ते विद्यमाना वृत्त्यवयवा भवन्ति, तदा त्रिषु लिङ्गेष्वेषां नदीसंज्ञा भवति। यथा – अतिलक्ष्म्यै ब्राह्मण्यै। अतिलक्ष्म्यै ब्राह्मणाय। अतिलक्ष्म्यै कुलाय। बहुश्रेयस्यै स्त्रियै। बहुश्रेयस्यै पुरुषाय। बहुश्रेयस्यै कुलाय। अतिचम्वै ब्राह्मण्यै। अतिचम्वै ब्राह्मणाय। अतिचम्वै कुलाय।

नेयङुवङ्स्थानावस्त्री ।१।४।४। इयङुवङोः स्थितिर्ययोः तौ ईदूतौ नदीसंज्ञौ न भवतः, स्त्रीशब्दं विना।

वामि ।१।४।५।। इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि परतो वा नदीसंज्ञौ भवतः, न तु स्त्री।

ङिति ह्रस्वश्च ।१।४।६।। इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च इवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ भवतो, ङिति परतः। सुप्प्रत्ययेषु ङे, ङसि, ङस्, ङि, एते ङित्प्रत्ययाः सन्ति। इत्थञ्चाहत्य त्रयाणां सूत्राणामयं तात्पर्यार्थः फलति –

१. इयङुवङ्स्थानिनाम् ईकारान्तानाम्, ऊकारान्तानां नित्यस्त्रीलिङ्गशब्दानाम्, आमि, ङिति च परतो वा नदीसंज्ञा भवति। यथा – श्रीः–श्रिये, श्रियै, श्रियां, श्रीणाम्। भ्रूः–भ्रुवे, भ्रुवै, भ्रुवां, भ्रूणाम्। स्त्रीशब्दस्य तु नित्यं नदीसंज्ञैव भवति। स्त्रियै, स्त्रीणाम्।

२. ह्रस्वेकारान्तानां, ह्रस्वोकारान्तानां स्त्रीलिङ्गशब्दानां, ङिति परतो वा नदीसंज्ञा भवति। यथा – मतिः–मतये–मत्यै। धेनुः–धेनवे–धेन्वै। **येषामीकारान्तानाम्, ऊकारान्तानाञ्च शब्दानां नदीसंज्ञा भवति तेषामिमानि चत्वारि कार्याणि भवन्ति –**

अम्बार्थनद्योर्ह्रस्वः ।७।३।१०७।। अम्बार्थानां नद्यन्तानां च ह्रस्वो भवति, सम्बुद्धौ।

हे गौरी > हे गौरि। हे ब्रह्मबन्धू > हे ब्रह्मबन्धु।

आण् नद्याः ।७।३।११२।। ङे, ङसि, ङस्, एतेषां ङित्प्रत्ययानां नद्यन्तात्परेषामाडागमो भवति। गौरी + ए > गौरी + आ ए > आटश्चेति वृद्धौ > गौरी + ऐ > गौर्यै। ब्रह्मबन्ध्वै

ङेराम् नद्याम्नीभ्यः ।७।३।११६।। नद्यन्तादाबन्तान्नीशब्दाच्च परस्य ङेराम् इत्यादेशो भवति। गौर्याम्। ब्रह्मबन्ध्वाम्।

ह्रस्वनद्यापो नुट् ।७।१।५४।। ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमो भवति। गौरीणाम्। ब्रह्मबन्धूनाम्।

इदानीं नदीसंज्ञकानां रूपाणि निष्पादयामः। गौरी + सु – हल्ङ्यादिलोपे > गौरी।

गौरी + औ > इको यणचि इति प्राप्तं यणादेशं बाधित्वा 'प्रथमयोः०' इति पूर्वसवर्णदीर्घे प्राप्ते–

दीर्घाज्जसि च (पा०सू०६.१.१०३) दीर्घात् जसि इचि च परतः पूर्वसवर्णदीर्घैकादेशो न भवति। तेन पुनः यणादेशे – गौरी + औ > गौर्यौ। एवं – गौरी + जस् > गौर्यः।

गौरी + शस् – इको यणचि इति प्राप्तं यणादेशं बाधित्वा 'प्रथमयोः०' इति पूर्वसवर्णदीर्घे – गौरीः। अन्यत्र सन्धिरेव कार्यम्। ऊकारान्ता अपि एवमेव।

नदीसंज्ञकस्य कृते विशेषप्रत्ययाः			**ईकारान्तो नदीसंज्ञकः गौरीशब्दः**		
×	×	×	गौरी	गौर्यौ	गौर्यः
×	×	×	गौरीम्	गौर्यौ	गौरीः
×	×	×	गौर्या	गौरीभ्याम्	गौरीभिः
ऐ	×	×	*गौर्यै*	गौरीभ्याम्	गौरीभ्यः
आः	×	×	*गौर्याः*	गौरीभ्याम्	गौरीभ्यः

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

आः	×	*नाम्*	*गौर्याः*	गौर्योः	*गौरीणाम्*
आम्	×	×	*गौर्याम्*	गौर्योः	गौरीषु
			हे गौरि	हे गौर्यौ	हे गौर्यः

नदीसंज्ञकस्य कृते विशेषप्रत्ययाः			ऊकारान्तो नदीसंज्ञको वधूशब्दः		
×	×	×	वधूः	वध्वौ	वध्वः
×	×	×	वधूम्	वध्वौ	वधूः
×	×	×	वध्वा	वधूभ्याम्	वधूभिः
ऐ	×	×	*वध्वै*	वधूभ्याम्	वधूभ्यः
आः	×	×	*वध्वाः*	वधूभ्याम्	वधूभ्यः
आः	×	*नाम्*	*वध्वाः*	वध्वोः	*वधूनाम्*
आम्	×	×	*वध्वाम्*	वध्वोः	वधूषु
			हे वधु	हे वध्वौ	हे वध्वः

अत्र ध्येयम् – अवी, : तन्त्री:, तरीः, लक्ष्मीः, धीः, श्रीः, ह्रीः, इत्येते ईकारान्ताः शब्दा ङ्यन्ता न सन्ति। अत एभ्यः परस्य सोर्लोपो न भवति।

पुंल्लिङ्गे नदीसंज्ञायामयं विशेषः –यदा पुंल्लिङ्गे नदीसंज्ञा भवति, तदा शस्प्रत्यये 'तस्माच्छसो नः पुंसि' इत्यनेन सकारस्य नकारो भवति – बहुश्रेयसीन् पुरुषान्। अतिचमून् नृपान्।स्त्रियामयं नकारो न भवति। बहुश्रेयसीः स्त्रीः।

ये अनदीसंज्ञका ईकरान्ता ऊकारान्ताश्च, ग्रामणीः, प्रधी, खलपूः, इत्यादयः, तत्र सन्धिरेव कार्यम्। ग्रामणी इत्यत्र ङेरामादेश इति विशेषः।

१६.४.७ पुंल्लिङ्गे घिसंज्ञका इदन्ता उदन्ताः

घिसंज्ञकानां कृते प्रत्ययादेशाः

आङो नाऽस्त्रियाम् ।७।३।१२०।। घेः परस्य टाप्रत्ययस्य स्थाने ना आदेशो भवति, स्त्रियाम्। आङिति टासंज्ञा प्राचाम्। हरि + टा = हरिणा। अयं नादेशः स्त्रियां न भवति – मति + टा = मत्या।

अच्च घेः ।७।३।११९।। इदुद्भ्यामुत्तरस्य ङेरौत् इत्यादेशो भवति, घेश्चाकारः अन्तादेशः। हरि + औ > हर + औ = हरौ। मति + औ > मत + औ = मतौ। धेनु + औ > धेन + औ = धेनौ।

घिसंज्ञकानां कृतेऽङ्गकार्याणि

हरि + सु – रुत्वसिर्गौ – हरिः। हरि + औ – यणं बाधित्वा 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णैदीर्घे – हरी। हरि + जस् – यणं बाधित्वा 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे प्राप्ते –

जसि च ।७।३।१०९।। ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे। हरे + अस् – हरयः।

हे हरे + सु –

ह्रस्वस्य गुणः ।७।३।१०८।। ह्रस्वस्य गुणो भवति, सम्बुद्धौ।'एङ् ह्रस्वात् सम्बुद्धेः' इति सम्बुद्धिलोपः। हे हरे। हरिम्। हरी। हरीन्। हरिणा। हरिभ्याम्। हरिभिः।

घेर्ङिति ।७।३।१११।। घिसंज्ञकस्य ङिति सुपि गुणो भवति। ङे, ङसि, ङस्, ङि, एते ङित्प्रत्ययाः सन्ति। हरे + ए > 'घेर्ङिति' इति गुणे कृते > हरे + ए > अयादेशे – हरये। हरिभ्याम्। हरिभ्यः। हरि + ङस् > घेर्ङिति इति गुणे > हरे + अस् –

© jkf"V";laLd`rlaLFkku-]uonsgyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

ङसिङसोश्च।६।१।११०।।एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात्।हरेः।हर्योः। हरीणाम्। हरि + ङि > अच्च घेः इति ङेरौत् इत्यादेशे घेश्चाकारान्तादेशे – हर + औ = हरौ। हर्योः। हरिषु। एवं श्रीपतिः। अग्निः। कविः। इत्यादयः। एवमेव उदन्तानां पुंसि रूपाण्यूह्यानि।

१६.४.८ स्त्रीलिङ्गे घिसंज्ञका इदन्ता उदन्ताः

ह्रस्वेकारान्तानां, ह्रस्वोकारान्तानां स्त्रीलिङ्गशब्दानां, ङिति परतो वा नदीसंज्ञा भवति। नदीसंज्ञायां ङे, ङसि, ङस्, एतेषां ङित्प्रत्ययानां 'आण् नद्याः' इत्याडागमो भवति। मत्यै, मत्याः, मत्याः। धेन्वै, धेन्वाः, धेन्वाः। पक्षे – घिसंज्ञायां रूपाणि हरिवदेव।

इदुद्भ्याम्।७।३।११७।।ह्रस्वेकारान्तेभ्यः, ह्रस्वोकारान्तेभ्यः नदीसंज्ञकेभ्यः स्त्रीलिङ्ग-शब्देभ्यः, परस्य ङेराम् भवति। मत्याम्। धेन्वाम्।

पक्षे नदीसंज्ञाभावे घिसंज्ञायाम् 'अच्च घेः' इति ङेरौत् – मतौ। धेनौ।

घिसंज्ञकः			**ङिति वा नदीसंज्ञकः**		
इकारान्तः पुंल्लिङ्गो हरिशब्दः			**इकारान्तो घिसंज्ञको नित्यस्त्रीलिङ्गो मतिशब्दः**		
हरिः	हरी	हरयः	मतिः	मती	मतयः
हरिम्	हरी	हरीन्	मतिम्	मती	मतीः
हरिणा	हरिभ्याम्	हरिभिः	मत्या	मतिभ्याम्	मतिभिः
हरये	हरिभ्याम्	हरिभ्यः	मतये, मत्यै	मतिभ्याम्	मतिभ्यः
हरेः	हरिभ्याम्	हरिभ्यः	मतेः, मत्याः	मतिभ्याम्	मतिभ्यः
हरेः	हर्योः	हरीणाम्	मतेः, मत्याः	मत्योः	मतीनाम्
हरौ	हर्योः	हरिषु	मतौ, मत्याम्	मत्योः	मतिषु
हे हरे	हे हरी	हे हरयः	हे मते	हे मती	हे मतयः

घिसंज्ञकः			**ङिति वा नदीसंज्ञकः**		
उकारान्तः पुंल्लिङ्गो गुरुशब्दः			**उकारान्तो घिसंज्ञको नित्यस्त्रीलिङ्गो धेनुशब्दः**		
गुरुः	गुरू	गुरवः	धेनुः	धेनू	धेनवः
गुरुम्	गुरू	गुरुन्	धेनुम्	धेनू	धेनूः
गुरुणा	गुरुभ्याम्	गुरुभिः	धेन्वा	धेनुभ्याम्	धेनुभिः
गुरवे	गुरुभ्याम्	गुरुभ्यः	धेनवे, धेन्वै	धेनुभ्याम्	धेनुभ्यः
गुरोः	गुरुभ्याम्	गुरुभ्यः	धेनोः, धेन्वाः	धेनुभ्याम्	धेनुभ्यः
गुरोः	गुर्वोः	गुरूणाम्	धेनोः, धेन्वाः	धेन्वोः	धेनूनाम्
गुरौ	गुर्वोः	गुरुषु	धेनौ, धेन्वाम्	धेन्वोः	धेनुषु
हे गुरो	हे गुरू	हे गुरवः	हे धेनो	हे धेनू	हे धेनवः

पुंल्लिङ्गे घिसंज्ञायामयं विशेषः – यदा पुंल्लिङ्गे घिसंज्ञा भवति, तदा शस्प्रत्यये 'तस्माच्छसो नः पुंसि' इत्यनेन सकारस्य नकारो भवति – हरीन्। गुरून्। स्त्रियामयं नकारो न भवति।

१६.४.९ नपुंसकलिङ्गे इदन्ता उदन्ताः

ह्रस्वो नपुंसके प्रातिपदिकस्य।१।२।४७।। क्लीबे प्रातिपदिकस्याऽजन्तस्य ह्रस्वो भवति। यथा – बहुश्रेयसी-बहुश्रेयसि। अतिचमू-अतिचमु। अतोऽत्र ह्रस्वान्ता एवोच्यन्ते। वारि + सु –

स्वमोर्नपुंसकात् ।७।१।२३।। नपुंसकादङ्गात् परयोः स्वमोर्लुक् भवति। वारि। वारि।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

नपुंसकाच्च ।७।१।१९।। नपुंसकाद् अङ्गादुत्तरस्य औङः स्थाने शी इत्यादेशो भवति। वारि + औ > वारि + शी > वारि + ई –

इकोऽचि विभक्तौ ।७।१।७३।। इगन्तस्य क्लीबस्य नुमागमो भवति अजादौ विभक्तौ। वारिन् + ई = वारिणी। वारि + जस् – 'जश्शसोः शिः' इति शि इत्यादेशे – वारि + इ –

नपुंसकस्य झलचः ।७।१।७२।। झलन्तस्याऽजन्तस्य च नपुंसकस्य नुमागमो भवति, सर्वनामस्थाने परे। वारि + जस् > वारि + शि > वारि + इ > नुमागमे – वारिन् + इ –

सर्वनामस्थाने चासम्बुद्धौ ।६।४।८।। नान्तस्योपधाया दीर्घो भवति असम्बुद्धौ सर्वनामस्थाने परे। वारीन् + इ = वारीणि। द्वितीयायां प्रथमावत्।

सम्बोधने – वारि + सु –

ह्रस्वस्य गुणः ।७।३।१०८।। ह्रस्वस्य गुणो भवति, सम्बुद्धौ।'एङ् ह्रस्वात् सम्बुद्धेः' इति सम्बुद्धिलोपः। हे वारे। हे वारिणी। हे वारीणि। वारि + टा –'आङो नाऽस्त्रियाम्' इति नादेशे – वारिणा।

वारि + ङे – 'इकोऽचि विभक्तौ' इत्यजादौ विभक्तौ नुमागमे – वारिणे। वारिणः। वारिणोः।

वारि + आम्। अत्र पूर्वविप्रतिषेधेन नुमागमं बाधित्वा 'ह्रस्वनद्यापो नुट्' इति नुडागमो भवति। तेन 'नामि' इति दीर्घः – वारीणाम्। वारिणि। वारिणोः। हलादौ हरिवत्।। एवं मधु, अश्रु, वस्तु, जानु, तालु, सानु, जतु, इत्यादयः।

इकारान्तः नपुंसकलिङ्गो वारिशब्दः			**उकारान्तो नपुंसकलिङ्गो मधुशब्दः**		
वारि	वारिणी	वारीणि	मधु	मधुनी	मधूनि
वारि	वारिणी	वारीणि	मधु	मधुनी	मधूनि
वारिणा	वारिभ्याम्	वारिभिः	मधुना	मधुभ्याम्	मधुभिः
वारिणे	वारिभ्याम्	वारिभ्यः	मधुने	मधुभ्याम्	मधुभ्यः
वारिणः	वारिभ्याम्	वारिभ्यः	मधुनः	मधुभ्याम्	मधुभ्यः
वारिणः	वारिणोः	वारीणाम्	मधुनः	मधुनोः	मधूनाम्
वारिणि	वारिणोः	वारिषु	मधुनः	मधुनोः	मधुषु
हे वारे	हे वारिणी	हे वारीणि	हे मधो	हे मधुनी	हे मधूनि

१६.४.१० ऋकारान्ताः

ऋतो ङिसर्वनामस्थानयोः ।७।३।११०।। ङौ, सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणो भवति। अनेन – कर्तृ + सु > इत्यत्र प्राप्तं गुणं प्रबाध्य अनङ् आदेशो भवति। सूत्रमस्ति –

ऋदुशनस्पुरुदंसोऽनेहसां च ।७।१।९४।। ऋदन्तानामुशनसादीनां चाऽनङ् आदेशो भवति असम्बुद्धौ सौ परे। कर्तृ + सु > कर्तन् + स्

सर्वनामस्थाने चासम्बुद्धौ ।६।४।८।। नान्तस्योपधाया दीर्घो भवति, असम्बुद्धौ सर्वनामस्थाने परतः। अनेन कर्तन् + स् इत्यत्र दीर्घे प्राप्ते –

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ।६।४।११।। अबादीनामेव उपधाया दीर्घो भवति, असम्बुद्धौ सर्वनामस्थाने परे। तृजन्तत्वादनेनोपधादीर्घे – कर्तान् + स् > सकारस्य हल्ङ्यादिलोपे – कर्तान् –

न लोपः प्रातिपदिकान्तस्य ।८।२।७।। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपो भवति, इति नकारलोपे – कर्ता।

© jkf"V";laLd`rlaLFkkue~]ubZ fnYyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

कर्तृ + औ > ऋतो ङिसर्वनामस्थानयोः इति गुणे > कर्तर् + औ > 'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृ-क्षत्तृहोतृपोतृप्रशास्तृणाम्' इति दीर्घे > कर्तारौ। कर्तारः। कर्तारम्। कर्तारौ।

सम्बोधने - कर्तः, कर्तारौ कर्तारः।

(अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम्, इत्यस्मिन् सूत्रे तृन्, तृच् प्रत्ययौ उक्तौ। एतेनैव उणादिनिष्पन्नानां नप्त्रादीनां दीर्घो भवितुमर्हति। पुनः नप्त्रादीनां ग्रहणं किमर्थं कृतम् ? पुनः नप्त्रादीनां ग्रहणादत्र नियमः क्रियते - असम्बुद्धौ सर्वनामस्थाने परे उणादिनिष्पन्नानां तृन्तृजन्तानां चेद्दीर्घो भवति, तर्हि नप्त्रादीनामेव, नान्येषाम्। तेन - माता मातरौ मातरः। पिता पितरौ पितरः, इत्यादिषु न दीर्घः।)

कर्तृ + शस् - प्रथमयोः पूर्वसवर्णः इति पूर्वसवर्णदीर्घे, 'तस्माच्छसो नः पुंसि' इत्यनेन सकारस्य नकारे - कर्तॄन्। कर्त्रा। कर्तृभ्याम्। कर्तृभिः। कर्त्रे। कर्तृभ्याम्। कर्तृभ्यः।

कर्तृ + ङस् - कर्तृ + अस् -

ऋत उत् ।६।१।१११।। ऋदन्तात् ङसिङसोरति परे पूर्वपरयोः स्थाने उकार एकादेशो भवति। रपरत्वम्। कर्तुर् + स् - अत्र संयोगान्तस्य लोपः, इत्यनेन प्राप्तो लोपो नियम्यते -

रात्सस्य ।८।२।२४।। रेफात्संयोगान्तस्य सस्यैव लोपो भवति, नान्यस्य। इति सकारलोपे रेफस्य विसर्गः। कर्तुः। कर्तृभ्याम्। कर्तृभ्यः। कर्तुः। कर्त्रोः। आमि 'ह्रस्वनद्यापो नुट्' इति नुडागमे, 'नामि' इति दीर्घे - कर्तॄणाम्।

कर्तृ + ङि 'ऋतो ङिसर्वनामस्थानयोः' इति गुणे - कर्तरि। कर्त्रोः। कर्तृषु।

ऋकारान्तः पुल्लिँगः कर्तृशब्दः			**ऋकारान्तः पुल्लिँगः पितृशब्दः**		
कर्ता	कर्तारौ	कर्तारः	पिता	पितरौ	पितरः
कर्तारम्	कर्तारौ	कर्तॄन्	पितरम्	पितरौ	पितॄन्
कर्त्रा	कर्तृभ्याम्	कर्तृभिः	पित्रा	पितृभ्याम्	पितृभिः
कर्त्रे	कर्तृभ्याम्	कर्तृभ्यः	पित्रे	पितृभ्याम्	पितृभ्यः
कर्तुः	कर्तृभ्याम्	कर्तृभ्यः	पितुः	पितृभ्याम्	पितृभ्यः
कर्तुः	कर्त्रोः	कर्तॄणाम्	पितुः	पित्रोः	पितॄणाम्
कर्तरि	कर्त्रोः	कर्तृषु	पितरि	पित्रोः	पितृषु
हे कर्तः	हे कर्तारौ	हे कर्तारः	हे पितः	हे पितरौ	हे पितरः

स्त्रीलिङ्गेऽयं विशेषः - पुंल्लिङ्गे शसप्रत्यये 'तस्माच्छसो नः पुंसि' इत्यनेन सकारस्य नकारो भवति - कर्तॄन्। पितॄन्। स्त्रियामयं नकारो न भवति - स्वसॄः। मातॄः। दुहितॄः। अन्यत् सर्वं पुंवदेव।

नपुंसकलिङ्गे - ऋकारान्तनपुंसकलिङ्गानां रूपाणि - कर्तृ कर्तृणी कर्तॄणि। कर्तृ कर्तृणी कर्तॄणि। शेषं पुंवत्।

१६.५ हलन्ताः

इदानीं हलन्तशब्दानां सुबन्तरूपनिष्पादनविधिरुच्यते। हलन्तप्रातिपदिकेषु तान्येव प्रातिपदिकान्यत्रोच्यन्ते, येषां रूपाणि भगवता पाणिनिनोक्तानि। येषां रूपनिष्पादनाय पाणिनिना किमपि नोक्तं, तत्र 'प्रातिपदिक+सुप्प्रत्ययः', अनयोः सन्धिरेव करणीयः। एतादृशाः शब्दाः परिशिष्टे उक्ताः। इदानीं पाणिनीयेन क्रमेण हलन्तशब्दा उच्यन्ते ---

हलन्तशब्दानां सुबन्तरूपनिष्पादनाय प्रत्ययानां त्रयो विभागाः करणीयाः -

१. सु औ जस् अम् औट्, इत्येतेषां पञ्च प्रत्ययानां सर्वनामस्थानसंज्ञा भवति। एषां रूपाणि

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

समानानि भवन्ति। अत्रैकस्य सिद्धौ सत्यां तत्सदृशा अन्ये स्वयमेव सिध्यन्ति।

२. शस्।टा।ङे। ङसि। ङस्। ओस्।आम्। ङि।ओस्।एषु प्रत्ययेषु परतोऽङ्गस्य भसंज्ञा भवति। एषां रूपाणि समानानि भवन्ति। अत्रैकस्य सिद्धौ सत्यां तत्सदृशा अन्ये स्वयमेव सिध्यन्ति।

३. भ्याम्।भिस्।भ्याम्।भ्यस्।भ्याम्।भ्यस्।सुप्।एषु प्रत्ययेषु परतोऽङ्गस्य पदसंज्ञा भवति। एषां रूपाणि समानानि भवन्ति। अत्रैकस्य सिद्धौ सत्यां तत्सदृशा अन्ये स्वयमेव सिध्यन्ति।

१६.५.१ अन्नन्ताः

सर्वनामस्थाने चासम्बुद्धौ ।६।४।८।। नान्तस्योपधाया दीर्घो भवति, असम्बुद्धौ सर्वनामस्थाने परतः। राजन् + सु > राजन् + स् > उपधादीर्घे > राजान् + स्।

सकारस्य हल्ङ्यादिलोपे > राजान् –

न लोपः प्रातिपदिकान्तस्य ।८।२।७।। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपो भवति, इति नकारलोपे – राजा।

'**न ङिसम्बुद्ध्योः** (८.२.८)' इत्यनेन सम्बुद्धौ परतो नलोपो न भवति। हे राजन्।

राजानौ। राजानः। राजानम्। राजानौ।

शस्। टा। ङे। ङसि। ङस्। ओस्। आम्। ङि। ओस्। एषु नवसु प्रत्ययेषु परतः –

अल्लोपोऽनः ।६।४।१३४।। अन्नन्तस्य भस्य अकारलोपो भवति।

राजन् + शस् > राज्न् + अस् > स्तोः श्चुना श्चुः इति नकारस्य श्चुत्वे – राज्ञ् + अस् = राज्ञः। राज्ञा। राज्ञे। राज्ञः। राज्ञः। राज्ञोः। राज्ञाम्। राज्ञि। राज्ञोः।

विभाषा ङिश्योः ।६।४।१३६।।अन्नन्तस्य भस्य अकारलोपो वा भवति, ङिश्योः परयोः। राजनि, राज्ञि।

भ्याम्। भिस्। भ्याम्। भ्यस्। भ्याम्। भ्यस्। सुप्। एषु सप्तसु प्रत्ययेषु परतो पूर्वस्य पदत्वात् 'न लोपः प्रातिपदिकान्तस्य' इति नलोपे – राजभ्याम्। राजभिः। राजभ्याम्। राजभ्यः। राजभ्याम्। राजभ्यः। राजसु।

न संयोगाद्वमन्तात् ।६।४।१३७।। वकारान्ताद् मकारान्तात् संयोगात् परस्यानोऽकारस्य लोपो न भवति। अतो यज्वन्, ब्रह्मन्, आत्मन्, चर्मन्, वर्मन् इत्यादिषु 'अल्लोपोऽनः' इत्यल्लोपो न विधेयः। यज्वनः। यज्वना। ब्रह्मणः। ब्रह्मणा। आत्मनः। आत्मना।

अन्नन्तः पुंल्लिङ्गो राजन्शब्दः			**मान्तसंयोगादुत्तरः अन् यस्मिन् तादृशः आत्मन्शब्दः**		
राजा	राजानौ	राजानः	आत्मा	आत्मानौ	आत्मानः
राजानम्	राजानौ	राज्ञः	आत्मानम्	आत्मानौ	आत्मनः
राज्ञा	राजभ्याम्	राजभिः	आत्मना	आत्मभ्याम्	आत्मभिः
राज्ञे	राजभ्याम्	राजभ्यः	आत्मने	आत्मभ्याम्	आत्मभ्यः
राज्ञः	राजभ्याम्	राजभ्यः	आत्मनः	आत्मभ्याम्	आत्मभ्यः
राज्ञः	राज्ञोः	राज्ञाम्	आत्मनः	आत्मनोः	आत्मनाम्
राज्ञि, राजनि	राज्ञोः	राजसु	आत्मनि	आत्मनोः	आत्मसु
हे राजन्	हे राजानौ	हे राजानः	हे आत्मन्	हे आत्मानौ	हे आत्मानः

यज्वन्, ब्रह्मन्, चर्मन्, वर्मन् इत्यादीनां रूपाणि आत्मन्वद् भवन्ति।

© jkf"V";laLd`rlaLFkkue~]ubZfnYyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

१६.५.२ श्वन्-युवन्-मघवन्, इत्येतेऽन्नन्ताः

श्वयुवमघोनामतद्धिते ।६।४।१३३।। अन्नन्तानां भसंज्ञकानामेषामतद्धिते परे सम्प्रसारणं भवति। अत्र ध्येयम् –

शस्।टा।ङे। ङसि। ङस्। ओस्।आम्। ङि।ओस्।एषु नवसु प्रत्ययेषु परतोऽङ्गस्य भसंज्ञा भवति।अत एषु परतः सम्प्रसारणं भवति – श्वन् + शस् = शुनः। युवन् + शस् = यूनः। मघवन् + शस् + मघोनः।

भ्याम्।भिस्।भ्याम्।भ्यस्।भ्याम्।भ्यस्।सुप्।एषु सप्तसु प्रत्ययेषु परतो पूर्वस्य पदत्वात् 'न लोपः प्रातिपदिकान्तस्य' इति नलोपो भवति – श्वभ्याम्।युवभ्याम्।मघवभ्याम्।

अन्नन्तः पुल्लिँङ्गः श्वन्शब्दः			**अन्नन्तः पुल्लिँङ्गः युवन्शब्दः**		
श्वा	श्वानौ	श्वानः	युवा	युवानौ	युवानः
श्वानम्	श्वानौ	शुनः	युवानम्	युवानौ	यूनः
शुना	श्वभ्याम्	श्वभिः	यूना	युवभ्याम्	युवभिः
शुने	श्वभ्याम्	श्वभ्यः	यूने	युवभ्याम्	युवभ्यः
शुनः	श्वभ्याम्	श्वभ्यः	यूनः	युवभ्याम्	युवभ्यः
शुनः	शुनोः	शुनाम्	यूनः	यूनोः	यूनाम्
शुनि	शुनोः	श्वसु	यूनि	यूनोः	युवसु
हे श्वन्	हे श्वानौ	हे श्वानः	हे युवन्	हे युवानौ	हे युवानः

एवं मघवन्। मघवा मघवानौ मघवानः। इत्यादीनि।

१६.५.३ पूषन्, अर्यमन्, अन्नन्तौ

इन्हन्पूषार्यम्णां शौ ।६।४।१२।।इन्, हन्, पूषन्, अर्यमन्, एषां शावेवोपधाया दीर्घो नान्यत्र।
सौ च ।६।४।१३।। इन्हन्पूषार्यम्णामुपधाया असम्बुद्धौ सौ परे दीर्घो भवति।

अन्नन्तः पुंल्लिङ्गः पूषन्शब्दः			**अन्नन्तः पुंल्लिङ्गः अर्यमन्शब्दः**		
पूषा	पूषणौ	पूषणः	अर्यमा	अर्यमणौ	अर्यमणः
पूषणम्	पूषणौ	पूष्णः	अर्यमणम्	अर्यमणौ	अर्यम्णः
पूष्णा	पूषभ्याम्	पूषभिः	अर्यम्णा	अर्यमभ्याम्	अर्यमभिः
पूष्णे	पूषभ्याम्	पूषभ्यः	अर्यम्णे	अर्यमभ्याम्	अर्यमभ्यः
पूष्णः	पूषभ्याम्	पूषभ्यः	अर्यम्णः	अर्यमभ्याम्	अर्यमभ्यः
पूष्णः	पूष्णोः	पूष्णाम्	अर्यम्णः	अर्यम्णोः	अर्यम्णाम्
पूष्णि	पूष्णोः	पूषसु	अर्यम्णि	अर्यम्णोः	अर्यमसु
हे पूषन्	हे पूषणौ	हे पूषणः	हे अर्यमन्	हे अर्यमणौ	हे अर्यमणः

१६.५.४ इन्नन्ताः

दण्डिन् + सु। 'सौ च' इत्युपधादीर्घे 'न लोपः प्रातिपदिकान्तस्य' इति नलोपे – दण्डी।

इन्नन्तः पुंल्लिङ्गो दण्डिन्शब्दः			**इन्नन्तः पुंल्लिङ्गः पथिन्शब्दः**		
दण्डी	दण्डिनौ	दण्डिनः	पन्थाः	पन्थानौ	पन्थानः
दण्डिनम्	दण्डिनौ	दण्डिनः	पन्थानम्	पन्थानौ	पथः
दण्डिना	दण्डिभ्याम्	दण्डिभिः	पथा	पथिभ्याम्	पथिभिः

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

दण्डिने	दण्डिभ्याम्	दण्डिभ्यः	पथे	पथिभ्याम्	पथिभ्यः
दण्डिनः	दण्डिभ्याम्	दण्डिभ्यः	पथः	पथिभ्याम्	पथिभ्यः
दण्डिनः	दण्डिनोः	दण्डिनाम्	पथः	पथोः	पथाम्
दण्डिनि	दण्डिनोः	दण्डिषु	पथि	पथोः	पथिषु
हे दण्डिन्	हे दण्डिनौ	हे दण्डिनः	हे पन्थाः	हे पन्थानौ	हे पन्थानः

भ्याम्। भिस्। भ्याम्। भ्यस्। भ्याम्। भ्यस्। सुप्। एषु सप्तसु प्रत्ययेषु परतो पूर्वस्य पदत्वात् 'न लोपः प्रातिपदिकान्तस्य' इति नलोपो भवति। दण्डिभ्याम्, दण्डिभिः।

इन्नन्ता नपुंसके – **'इन्हन्पूषार्यम्णां शौ'** इत्यनेन शौ दीर्घो भवति। तेन –

बहुदण्डि बहुदण्डिनी बहुदण्डीनि। बहुदण्डि बहुदण्डिनी बहुदण्डीनि। शेषं पुंवत्।

पथिन्शब्दस्य रूपाणि लिखितानि। प्रक्रिया न लिखिता।

१६.५.५ अत्वन्ताः

गतवत्, भवत्, भगवत्, बुद्धिमत्, इत्यादयः शब्दा अत्वन्ताः। एषामन्ते प्रत्ययस्य 'अतु' वर्तते। एषामत्वन्तानां नुमागमो भवति सर्वनामस्थाने परतः।

उगिदचां सर्वनामस्थानेऽधातोः ।७।१।७०।। अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमो भवति सर्वनामस्थाने परे। गतवत् + सु > नुमागमे > गतवन्त् + स्। हल्ङ्यादिलोपे, संयोगान्तलोपे–

अत्वसन्तस्य चाधातोः ।६।४।१४।। अत्वन्तस्य धातुभिन्नासन्तस्य चोपधाया दीर्घो भवति असम्बुद्धौ सौ परतः। अनेनोपधादीर्घे > गतवान्। गतवन्तौ। गतवन्तः। गतवन्तम्। गतवन्तौ।

अग्रे सन्धिरेव कार्यम् – गतवतः। गतवता। गतवद्भ्यामित्यादि।

नपुंसकलिङ्गे – गतवत् गतवती। गतवत् + शि – 'शि' इति सर्वनामस्थानम्। तस्मिन् नुमागमे – गतवत् + शि – गतवन्त् + इ = गतवन्ति। गतवत् गतवती गतवन्ति। गतवत् गतवती गतवन्ति। शेषं पुंवत्।

अत्वन्तः पुंल्लिङ्गो गतवत्शब्दः			**शत्रन्तः पुंल्लिङ्गो गच्छत्शब्दः**		
गतवान्	गतवन्तौ	गतवन्तः	गच्छन्	गच्छन्तौ	गच्छन्तः
गतवन्तम्	गतवन्तौ	गतवतः	गच्छन्तम्	गच्छन्तौ	गच्छतः
गतवता	गतवद्भ्याम्	गतवद्भिः	गच्छता	गच्छद्भ्याम्	गच्छद्भिः
गतवते	गतवद्भ्याम्	गतवद्भ्यः	गच्छते	गच्छद्भ्याम्	गच्छद्भ्यः
गतवतः	गतवद्भ्याम्	गतवद्भ्यः	गच्छतः	गच्छद्भ्याम्	गच्छद्भ्यः
गतवतः	गतवतोः	गतवताम्	गच्छतः	गच्छतोः	गच्छताम्
गतवति	गतवतोः	गतवत्सु	गच्छति	गच्छतोः	गच्छत्सु
हे गतवन्	हे गतवन्तौ	हे गतवन्तः	हे गच्छन्	हे गच्छन्तौ	हे गच्छन्तः

१६.५.६ शत्रन्ताः

गच्छत्, पठत्, कुर्वत्, इत्यादयः शब्दाः शत्रन्ताः। एषामन्ते प्रत्ययस्य 'शतृ'प्रत्ययो वर्तते। एषां शत्रन्तानामपि उगित्त्वाद् 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमो भवति सर्वनामस्थाने परतः। किन्तु अत्वन्ताभावादुपधादीर्घो न भवति। शेषं गतवत्–वत्।

© jkf"V";laLd`rlaLFkkue~]uoanYyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

१६.५.७ महत्-शब्दः, तकारान्तः

सान्तमहतः संयोगस्य ।६।४।१०।।सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घो भवति, असम्बुद्धौ सर्वनामस्थाने परे। महत् – महान् महान्तौ महान्तः। महान्तम् महान्तौ। शेषं गतवत्–वत्।

अन्ये ये तकारान्ताः सरित–भूभृत्–इत्यादयः, तत्र नास्ति किमप्यङ्गकार्यम्, सन्धिरेव कार्यम्।

तकारान्तः महत्शब्दः			**तकारान्तः भूभृत् शब्दः**		
महान्	महान्तौ	महान्तः	भूभृत्	भूभृतौ	भूभृतः
महान्तम्	महान्तौ	महतः	भूभृतम्	भूभृतौ	भूभृतः
महता	महद्भ्याम्	महद्भिः	भूभृता	भूभृद्भ्याम्	भूभृद्भिः
महते	महद्भ्याम्	महद्भ्यः	भूभृते	भूभृद्भ्याम्	भूभृद्भ्यः
महतः	महद्भ्याम्	महद्भ्यः	भूभृतः	भूभृद्भ्याम्	भूभृद्भ्यः
महतः	महतोः	महताम्	भूभृतः	भूभृतोः	भूभृताम्
महति	महतोः	महत्सु	भूभृति	भूभृतोः	भूभृत्सु
हे महान्	हे महान्तौ	हे महान्तः	हे भूभृत्	हे भूभृतौ	हे भूभृतः

१६.५.८ असन्ताः पुल्लिँङ्गे

अत्वसन्तस्य चाधातोः ।६।४।१४।। अत्वन्तस्य धातुभिन्नासन्तस्य चोपधाया दीर्घो भवति असम्बुद्धौ सौ परतः। चन्द्रमस् + सु – उपधादीर्घे, सकारस्य रुत्वविसर्गौ – चन्द्रमाः।

अन्यत्र सन्धिरेव कार्यम्। चन्द्रमस् + भ्याम् – सकारस्य रुत्वे 'हशि चे'ति उत्वे, गुणे – चन्द्रमोभ्याम्। चन्द्रमस् + सु > सकारस्य रुत्वे विसर्गे > चन्द्रमः + सु > वा शरि इति विसर्गस्य सकारविकल्पे > चन्द्रमःसु, चन्द्रमस्सु।

चन्द्रमस्,वनौकस्, वेधस्, दिवौकस्, दुर्वासस्, सुमनस्, इत्यादयः शब्दा असन्ताः।

१६.५.९ असन्ताः नपुंसकलिङ्गे

नपुंसके प्रत्यया भवन्ति – ० शी शि – प्रथमा। ० शी शि – द्वितीया।

पयस् + सु – सोर्लोपे, सकारस्य रुत्वे विसर्गे – पयः। पयस् + शी – पयस् + ई – पयसी। पयस् + शि – पयस् + इ। शि इति सर्वनामस्थानम्। अतो 'नपुंसकस्य झलचः' इति नुमागमे – पयन्स् – सान्तमहतः संयोगस्य इति उपधादीर्घे – पयान्स् + इ – नश्चापदान्तस्य झलि इति नकारस्यानुस्वारे – पयांसि। शेषं चन्द्रमस्वत्। एवं मनस्, सरस्, इत्यादीनि असन्तनपुंसकप्रातिपदिकानि।

१६.५.१० वस्वन्ताः

विद्वस् + सु –

उगिदचां सर्वनामस्थानेऽधातोः ।७।१।७०।। अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमो भवति सर्वनामस्थाने परे। विद्वस् + सु > नुमागमे > विद्वन्स् + स्।

सान्तमहतः संयोगस्य ।६।४।१०।। सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घो भवति असम्बुद्धौ सर्वनामस्थाने परे। अनेनोपधादीर्घे, हल्ङ्यादिलोपे, संयोगान्तलोपे – विद्वान् विद्वांसौ विद्वांसः विद्वांसम् विद्वांसौ। विद्वस् + शस् – अङ्गस्य भसंज्ञायाम्

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

वसोः सम्प्रसारणम् ।६।४।१३१ ।। वस्वन्तस्य भस्य सम्प्रसारणं भवति।

विद्वस् + शस्> विद् उ अ स् + अस्> अकारस्य पूर्वरूपे, सकारस्य षत्वे> विदुषः।विदुषा। एवं – टा। ङे। ङसि। ङस्। ओस्। आम्। ङि। ओस्। एषु प्रत्ययेषु रूपाणि।

विद्वस् + भ्याम् – 'वसुस्रंसुध्वंस्वनडुहां दः' इति सकारस्य दत्वे> विद्वद्भ्याम्।एवं – भिस्। भ्याम्। भ्यस्। भ्याम्। भ्यस्। सुप्। एवं तस्थिवस्, जग्मिवस्, सेदिवस्, इत्यादयः शब्दा वस्वन्ताः।

असन्तः पुंल्लिङ्गः चन्द्रमस्शब्दः

चन्द्रमाः	चन्द्रमसौ	चन्द्रमसः
चन्द्रमसम्	चन्द्रमसौ	चन्द्रमसः
चन्द्रमसा	चन्द्रमोभ्याम्	चन्द्रमोभिः
चन्द्रमसे	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
चन्द्रमसः	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
चन्द्रमसः	चन्द्रमसोः	चन्द्रमसाम्
चन्द्रमसि	चन्द्रमसोः	चन्द्रमःसु
हे चन्द्रमः	हे चन्द्रमसौ	हे चन्द्रमसः

वस्वन्तः पुंल्लिङ्गो विद्वस्शब्दः

विद्वान्	विद्वांसौ	विद्वांसः
विद्वांसम्	विद्वांसौ	विदुषः
विदुषा	विद्वद्भ्याम्	विद्वद्भिः
विदुषे	विद्वद्भ्याम्	विद्वद्भ्यः
विदुषः	विद्वद्भ्याम्	विद्वद्भ्यः
विदुषः	विदुषोः	विदुषाम्
विदुषि	विदुषोः	विद्वत्सु
हे विद्वन्	हे विद्वांसौ	हे विद्वांसः

अत्र ते शब्दा उक्ता, यत्र सुप्प्रत्ययनिमित्तकं किमपि कार्यं भवति। यत्र सुप्प्रत्ययनिमित्तकं किमपि कार्यं न भवति, तत्र प्रकृतिप्रत्यययोर्मध्ये सन्धिरेव कार्यम्। एते शब्दाः परिशिष्टे लिख्यन्ते। एषां पाठेन सन्धिविज्ञानमपि भविष्यति, सुबन्तसिद्धिरपि।

सूत्राणां बाहुल्याद् अस्मद्युष्मदोः, इदम्शब्दस्य च रूपाणि लिख्यन्ते। प्रक्रिया न लिख्यते।

अस्मद्शब्दः

अहम्	आवाम्	वयम्
माम्/मा	आवाम्/नौ	अस्मान्/नः
मया	आवाभ्याम्	अस्माभिः
मह्यम्/मे	आवाभ्याम्/नौ	अस्मभ्यम्/नः
मत्	आवाभ्याम्	अस्मत्
मम/मे	आवयोः/नौ	अस्माकं/नः
मयि	आवयोः	अस्मासु

युष्मद्शब्दः

त्वम्	युवाम्	यूयम्
माम्/मा	आवाम्/नौ	अस्मान्/नः
मया	आवाभ्याम्	अस्माभिः
मह्यम्/मे	आवाभ्याम्/नौ	अस्मभ्यम्/नः
मत्	आवाभ्याम्	अस्मत्
मम/मे	आवयोः/नौ	अस्माकं/नः
मयि	आवयोः	अस्मासु

इदम्शब्दः पुल्लिँङ्गे

अयम्	इमौ	इमे
इमम्	इमौ	इमान्
अनेन	आभ्याम्	एभिः
अस्मै	आभ्याम्	एभ्यः
अस्मात्	आभ्याम्	एभ्यः
अस्य	अनयोः	एषाम्
अस्मिन्	अनयोः	एषु

इदम्शब्दः स्त्रीलिङ्गे

इयम्	इमे	इमाः
इमाम्	इमे	इमाः
अनया	आभ्याम्	आभिः
अस्यै	आभ्याम्	आभ्यः
अस्याः	आभ्याम्	आभ्यः
अस्याः	अनयोः	आसाम्
अस्याम्	अनयोः	आसु

नपुंसकलिङ्गे – इदम् इमे इमानि। इदं इमे इमानि। शेषं पुंवत्।

© jkf"V³;laLd`rlaLFkkue-]uowsgyh]2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

१६.६ बोधप्रश्ना:

१. प्रातिपदिकसंज्ञाविधायकसूत्राणि कानि ?

....

....

....

२. सर्वनामस्थानसंज्ञा केषां प्रत्ययानां भवति, केन च सूत्रेण भवति ?

....

....

....

३. अदन्तात् अङ्गात् परस्य 'ङे' इत्यस्य स्थाने क आदेशो भवति ?

....

....

....

४. राम + शस्, इत्यत्र किं भवति ?

....

....

....

५. 'रामेभ्य:' इत्यत्र एकारादेश: केन सूत्रेण भवति ?

....

....

....

६. प्रथमाद्विवचने 'फले' इत्यत्र औङ: स्थाने 'शी' इत्यादेश: केन सूत्रेण भवति ?

....

....

....

७. नामि परे दीर्घ: केन सूत्रेण भवति ?

....

....

....

८. आमि सुडागमविधायकसूत्रं लिखतु ?

....

....

....

९. जश्शसो: स्थाने शि इत्यादेश: केन सूत्रेण भवति ?

....

....

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

....

१०. ङित्प्रत्ययस्य याडागमः केन सूत्रेण भवति ?

....

....

....

११. 'सर्वस्यै' इत्यत्र स्याडागमः केन सूत्रेण भवति ?

....

....

....

१२. नदीसंज्ञायाः किं फलम् ?

....

....

....

१३. घिसंज्ञायाः किं फलम् ?

....

....

....

१४. 'धेनौ' इत्यत्र औकारादेशः केन सूत्रेण भवति ?

....

....

....

१५. नलोपविधायकसूत्रं लिखतु ?

....

....

....

१६. अन्नन्तस्य भस्य अकारलोपः केन सूत्रेण भवति ?

....

....

....

१७. 'शुनः' इत्यत्र सम्प्रसारणम् केन सूत्रेण भवति ?

....

....

....

१८. इन्नन्तप्रातिपदिकानां शौ उपधाया दीर्घः केन सूत्रेण भवति ?

....

....

© jkf"V³;laLd`rlaLFkkue~] uonsgyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

....

१९. अत्वन्तानां सर्वनामस्थाने परतः नुमागमविधायकसूत्रं लिखतु ?

....

....

....

२०. 'विदुषः' इत्यत्र सम्प्रसारणं केन सूत्रेण भवति ?

....

....

....

१६.७ सारांशः

अस्य पाठस्याध्ययनेन भवताम् -

- सुबन्तप्रक्रियाया ज्ञानं सारल्येनाभूत्।
- सुबन्तपदानामपि ज्ञानं सारल्येनाभूत्।
- घि-नदी-भ-पद-सर्वनामस्थान-इत्यादीनां संज्ञानां प्रयोजनस्य ज्ञानमभूत्।
- संस्कृतभाषायाः कोशो वर्धितः।
- वाग्व्यवहारस्य सामर्थ्यं च वर्धितः।

१५.८ शब्दावली

इत्संज्ञा	सुबन्ताः	प्रातिपदिकम्	एकवचनम्	द्विवचनम्
बहुवचनम्	सर्वनामस्थानम्	भसंज्ञा	पदसंज्ञा	नुडागमः
पूर्वसवर्णः	सम्बुद्धिः	व द्धिः	गुणः	सुडागमः
याडागमः	स्याडागमः	नदीसंज्ञा	घिसंज्ञा	इयङ्
उवङ्	सम्प्रसारणम्।			

१६.९ सन्दर्भग्रन्थाः

१. सिद्धान्तकौमुदी, सुबन्तप्रकरणम्, चौखम्बा संस्क त प्रतिष्ठानम्, वाराणसी।

२. नव्य सिद्धान्तकौमुदी, सुबन्तप्रकरणम्।

१६.१० सहायकग्रन्थाः

१. प्रकरणनिर्देशसमन्वितः अष्टाध्यायीसूत्रपाठः, पुष्पादीक्षितक तः। संस्क त भारती, झण्डेवालान, नवदेहली।

१६.११ बोधप्रश्नोत्तराणि

१. अर्थवदधातुरप्रत्ययः प्रातिपदिकम्। क त्तद्धितसमासाश्च।

२. शि सर्वनामस्थानम्। सुडनपुंसकस्य।

३. ङेर्यः। सर्वनाम्नः स्मै।

४. प्रथमयोः पूर्वसवर्णः इति पूर्वसवर्णदीर्घः।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

५. बहुवचने झल्येत्।
६. नपुंसकाच्च।
७. नामि।
८. आमि सर्वनाम्न: सुट्।
९. जश्शसो: शि:।
१०. याडाप:।
११. सर्वनाम्न: स्याड्ह्रस्वश्च।
१२. ह्रस्वनद्यापो नुट्। आण्नद्या:। अम्बार्थनद्योर्ह्रस्व:। ङेराम्नद्याम्नीभ्य:।
१३. घेर्ङिति। अच्च घे:। आङो ना स्त्रियाम्।
१४. अच्च घे:।
१५. नलोप: प्रातिपदिकान्तस्य।
१६. अल्लोपो न:।
१७. श्वयुवमघोनामतद्धिते।
१८. इन्हन्पूषार्यम्णां शौ।
१९. अत्वसन्तस्य चाधातो:।
२०. वसो: सम्प्रसारणम्।

१६.१२ अभ्यासप्रश्ना:

~~१.~~ ~~सुप्प्रत्ययानां स्थाने ये आदेश भवन्ति, तेषां~~ सूत्राणि लिखन्तु ?
~~२.~~ येषामन्ते आारान्तो धातुरस्ति, तेषाकारान्तानां सुबन्तरूपाणि साधयतु ?
~~३.~~ ऋकारान्तप्रातिपदिकानां सुबन्तरूपाणि साधयतु ?
~~४.~~ नपुंसकलिङ्गे इदन्तानां उदन्ताना च सुबन्तरूपाणि साधयतु ?
५. नान्तशब्दा कतिविधा: ? तेषां रूपाणां मध्ये को भेद, इति विचार्य लिखतु।

◆❖◆❖◆❖◆❖◆

© jkf"V ;laLd`rlaLFkku-]ubZfnYyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.